ललाटं वदनञ्च पुंसां विस्तीर्णमेतत्त्रितयं प्रशस्तम्” विस्तीर्णचतुष्कप्रशस्ततयोक्तमिति भेदः ।[माके राजनि० ।

**त्रिबीज** पु० त्रीणि त्रीणि बीजानि प्रतिफलं यस्य । श्यामा-

**त्रिवृत्(ता)** पु० त्रीन् अवयवान् वृणोति वृ—क्विप् त्रिभिरवयवैर्वृता वा । १(तेओड़ि) औषधिभेदे, अमरः “श्वेता त्रिवृद्रोचनी स्यात् स्वादुरुष्णा समीरहृत् । रूक्षा पित्तज्वरश्लेष्मपित्तशोथोदरापहा । श्वेतकृष्णप्रभेदेन द्विविधा त्रिवृदुच्यते । श्यामा त्रिवृत्ततो हीनगुणा तीव्रा विरेचिका । मूर्च्छादाहमदभ्रान्तिकण्ठोत्कर्षणकारिणी” भावप्र० । वर्त्तनं वृत् त्रिः तिस्रः वृतो यत्र । एकस्य त्रिशब्दस्य त्रिवारे त्रिसंख्यान्विते च वृत्तिः तन्त्रोच्चारणात् । २त्रिधात्रिगुणिते त्रि० “विप्रस्योर्द्ध्ववृतं त्रिवृत्” इति मनुः त्रिगुणितसूत्रत्रयस्यैवोपवीतरूपत्वान्तथार्थता । त्रिर्वर्त्तते वृत-क्विप् । मिश्रितेषु ३तेजोजलान्नेषु च । “तासां त्रिवृतं त्रिवृतमेकैकां करवाणि” छा०उ० ४त्रिगुणिते “यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा । अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा” मनुः । त्रिभिरृग्यजुःसामभिर्वर्त्तते वृत—कर्त्तरि क्विप् । ५यज्ञे पु० । “यः सुपर्णो यजुर्नाम छन्दोगात्रस्त्रिवृच्छिराः” भा० शा० ४७ अ० । “त्रिवृत् यज्ञः शिरोऽस्य” नीलक० त्रिस्त्रिर्वर्त्तते सुजगभस्य त्रिशब्दस्य वीप्सार्थत्वम् । ६ऋग्विशेषाणां नवके । यथोक्तं सामसंहिताभाष्ये

“लौकिको वाक्यशेषार्थस्त्रिवृदादेः समत्वतः । उभौ विध्यर्थवाक्यैकवाक्यत्वादस्त्वहान्तिमः । “त्रिवृद्बहिष्पवमानम्” इति श्रुतौ त्रिवृच्छब्दस्य त्रैगुण्यं लोकसिद्धोऽर्थः वाक्यशेषादृक्-त्रयात्मकेषु सूक्तेष्ववस्थितानां बहिष्पवमानात्मक-स्तोत्र-निष्पादन-समाणाम् “उपास्मै गायता नरः (उ १प्र०१२, ३सू०)-इत्यादीनामृचां नवकोऽर्थः तत्र धर्मनिर्णये वेदस्य प्रबलत्वेऽपि पद-पदार्थनिर्णये लोकवेदयोः समान-बलवत्त्वात् उभावर्थौ विकल्पेन ग्रहीतव्यौ, इति चेत्—मैवम्, लौकिकार्थ-स्वीकार-पक्षे विधिवाक्ये त्रैगुण्यमर्थः, अर्थवाद-वाक्ये स्तोत्रियाणामृचां नवकम्, इत्येवं विध्यर्थवादयोर्वैयधिकरण्यादेकवाक्यत्वं न स्यात्, अतः एकवाक्यत्वाय स्तोत्रियाणां नवकमेव विधिवाक्ये नियतोऽर्थः” ।

**त्रिवृत्करण** न० ६त० । तेजो जलान्नानां त्र्यात्मककरणे तत्प्रकारश्च छा० उ० भाष्ये दर्शितो यथा

“तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् । तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा नु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति । यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां,यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् । यदादित्यस्य रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् । यच्चन्द्रमसो रोहितं रूपं, तेजसस्तद्रूपं यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्व वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् । यद्विद्युतो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ।

“सैवं तिस्रो देवता अनुप्रविश्य स्वात्मावस्थे बीजभूतेऽव्याकृते नामरूपे व्याकरवाणीतीक्षित्वा तासाञ्च तिसृणां देवतानामेकैकां त्रिवृतं त्रिवृतं करवाणि एकैकस्याः त्रिवृत्करणे एकैकस्याः प्राधान्यं द्वयोर्द्वयोर्गुणभावोऽन्यथा हि रज्ज्वा इवैकमेव त्रिवृत्करणं स्यात् । न तु तिसृणां पृथक् त्रिवृत्करणमिति । एवं हि तेजोबन्नानां पृथङ्नामप्रत्ययलाभः स्यात्तेज इदमिमा आपोऽन्नमिदमिति च । पृथङ्नामप्रत्ययलाभे देवतानां सम्यग्व्यवहारस्य प्रसिद्धिः प्रयोजनं स्यात् । एवमीक्षित्वा सेयं देवतेमास्तिस्रो देवता अनेनैव यथोक्तेनैव जीवेन सूर्य्यबिम्बवदन्तः प्रविश्य वैराजं पिण्डं प्रथमं देवतादीनां च पिण्डाननुप्रविश्य यथासङ्कल्पमेव नामरूपे व्याकरोदसौनामायमिदंरूप इति तासाञ्च देवतानां गुणप्रधानभावेन त्रिवृतं त्रिवृतमेकैकामकरोत् कृतवती देवता । तिष्ठतु तावद्देवतादिपिण्डानां नामरूपाभ्यां व्याकृतानां, तेजोबन्नमयत्वेन त्रिधात्वं यथा तु खलु बहिरिमाः पिण्डेभ्यस्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे मम निगदतो विजानीहि विस्पष्टमवधारयोदाहरणतः । यत्तद्देवतानां त्रिवृत्करणमुक्तं तस्यैवोदाहरणमुच्यते । उदाहरणं नामैकदेशप्रसिद्ध्याशेषप्रसिद्ध्यर्थमुदाह्रियत इति । तदेतदाह यदग्नेः त्रिवृत्कृतस्य रोहितं रूपं प्रसिद्धं लोके तदत्रिवृत्कृतस्य तेजसो रूपमिति विद्धि । तथा च यच्छुक्लं रूपमग्नेरेव तदपामत्रिवृत्कृतानाम्